**संस्थान के पास वाक्यार्थ/शास्त्रार्थ-सभा, शलाका-परीक्षा, शास्त्र-परीक्षा (मौखिक), शास्त्र-स्पर्धा, संस्कृत-श्लोक/पद्य/कविता लेखन के माध्यम से छात्रों के प्रदर्शन का मूल्यांकन करने की व्यवस्था है।**

***2.6.4 The Institution has mechanism to evaluate the performance of students through the vakyartha/shastrartha-Sabhas, Shalaka-Pareeksha, Shastra-Pareeksha (Oral), Shastra-spardha, Writing Sanskrit-Slokas/Padya/Poetry***

विश्वविद्यालये राज्यस्तरे, राष्ट्रस्तरे च शास्त्रस्पर्धासु भागग्रहणम्, वाक्यार्थसभानाम् आयोजनम् इत्यादिषु छात्राणां प्रस्तुतेः मूल्यांकनं सरलविदानेन क्रियते। तद्यथा–

1– वाक्यार्थसभा– विश्वविद्यालये साप्ताहिकी वाग्वर्धिनीसभा आयोज्यते। समयसारिण्याम् सभायाः कालांशः निर्धारितो भवति। अतः अनिवार्योपस्थितिः वर्तते। निर्दिष्टे/स्वाभीष्टे शास्त्रविषये तु वाक्यार्थं प्रस्तुवन्ति। विषये प्रस्तुते अध्यापकाः प्रश्नान् पृच्छन्ति। अंकदानेन प्रस्तुतानां वाक्यार्थानां श्रेणीनिर्धारणं क्रियते। अधिकासु सभासु गृहीतभागाः छात्राः पुरस्क्रियन्ते। शास्त्रसभा आयोज्यते। तत्र अध्यापकाः आदर्शवाक्यार्थं प्रस्तुवन्ति। छात्राः अनिवार्योपस्थित्या वाक्यार्थप्रस्तावं वीक्षमाणाः शास्त्रार्थप्रस्तुतेः कौशलम् अभ्यस्यन्ति। प्रश्नकरणाय ते छात्राः अनुमता भवन्ति।

2– अखिलभारतीयस्तरे शास्त्रीयस्पर्धानाम् आयोजनम्– विश्वविद्यालयः अखिलभारतीयस्तरे स्पर्धानाम् आयोजनस्य उत्तरदायित्वं निर्वहति। शास्त्रशलाका, शास्त्रभाषणम्, काव्यकण्ठपाठः, अमरकोषकण्ठपाठः, अष्टाध्यायीकण्ठपाठः, धातुरूपकण्ठपाठः, समस्यापूर्तिः, अक्षरश्लोकी, शास्त्रीयस्फूर्तिस्पर्धा इति एतासां प्रवर्तमानस्पर्धानां नियमावलीं सज्जीकरोति। राज्यस्तरे राष्ट्रस्तरे च अपेक्षिताः सूचनाः ददाति। छात्राणां साधुप्रस्तुतेः मूल्यांकनस्य च व्यवस्थां कल्पयति।

3– शलाकापरीक्षा– विश्वविद्यालये अध्यापकाः छात्रान् सज्जीकुर्वन्ति। चयनाय स्पर्धाम् आयोजयन्ति। ततः चिताः प्रतिभागिनः राज्यस्तरीयस्पर्धायां ततः अखिलभारतीयस्तरे च भागं गृह्णन्ति। राष्ट्रस्तरे सौवर्णशलाकया सौवर्णपदकेन धनराशिना प्रमाणपत्रेण च पुरस्क्रियन्ते। शलाकास्पर्धायां स्पर्धालुनां निर्दिष्टशास्त्रस्य निर्दिष्टग्रन्थभागस्य समग्रतया अध्ययनं कार्यम्। स्पर्धालुः ग्रन्थस्य निर्दिष्टभागस्य सर्वाः पंक्तिः कण्ठस्थीकुर्यात्, ग्रन्थपंक्तीनां विशदं व्याख्यानं कर्तुं सामर्थ्यं सम्पादयेत्, निर्दिष्टे ग्रन्थभागे विद्यमानविषयेषु गहनशास्त्रचर्चां कर्तुं, कौशलं सम्पादयेत्। परीक्षाविधानम् अखिलभारतीयायां राज्यस्तरीयायां च शलाकापरीक्षायां निर्दिष्टग्रन्थम् अधीतवतः प्रत्येकं स्पर्धालोः परीक्षणं त्रिषु घट्टेषु क्रियते।

- प्रथमः घट्टः स्मृतिबल/धारणाषक्तिपरीक्षणम्। परीक्षकैः शलाकया उद्धृतात् स्थानात् एका ग्रन्थपंक्तिः उच्चार्यते। ततः आरभ्य छात्रेण अग्रिमपंक्त्यः परीक्षकाः यावत् श्रोतुमिच्छन्ति तावत्पर्यन्तं श्रावणीयाः। परीक्षकेषु एकैकः अपि एकस्य छात्रस्य एतादृशपरीक्षणम् अन्यूनं त्रिवारं कुर्यात्। स्पर्धार्थिसंख्याम्, समयं च अनुसृत्य परीक्षकाः ततोऽधिकप्रश्नान् अपि कर्तुमर्हन्ति। परीक्षकैः असकृत् शलाकया एव प्रश्नस्थानानि उद्घाटनीयानि।
- द्वितीयः घट्टः व्याख्यानसामर्थ्यपरीक्षणम्। परीक्षकैः शलाकया उद्घाटितस्थानात् ग्रन्थपंक्तिरेका उच्चार्यते। तस्याः पंक्तेः विशदं व्याख्यानं छात्रः कुर्यात्। छात्रस्य एतादृशं परीक्षणं एकैकः अपि परीक्षकः अन्यूनं त्रिवारं कुर्यात्। परीक्षकैः प्रतिवारं शलाकया प्रश्नस्थानानि चेतव्यानि।
- तृतीयः घट्टः विषेषवगतिपरीक्षणम्/ गाढज्ञानपरीक्षणम्। परीक्षकाः निर्धारितग्रन्थभागे विद्यमाने विषये गहनप्रश्नान् कुर्युः। छात्रेण सह शास्त्रचर्चां कुर्युः। छात्रेण प्रदत्तसमाधानमनुसृत्य पुनः प्रश्नान् अपि परीक्षकाः कर्तुमर्हन्ति येन छात्रस्य ग्रन्थावगतेः स्तरः निर्णीतः भवेत्। प्रश्नपुनः प्रश्नरूपेण शास्त्रचर्चया समाधानं प्राप्नुयुः। इयं रीतिः पंचकृत्वः भवेत्। परीक्षायाम् उत्तीर्णानाम् एवं पुरस्काराय प्रथम/द्वितीय/तृतीयस्थाननिश्चयः क्रियते।

**4.** शास्त्रार्थविचारस्पर्धा विश्वविद्यालयस्य स्नातकादिषु पाठ्यक्रमेषु अधीयानाः छात्राः अस्यां भागं गृह्णन्ति। स्थानीयस्तरे, राज्यस्तरे, राष्ट्रस्तरे च इयं स्पर्धा संचाल्यते। शास्त्रार्थविचारस्पर्धा युगलवाक्यार्थस्पर्धा वर्तते। स्पर्धालुभिः निर्दिष्टविषये शास्त्रार्थविचार करणीयः। प्रदत्तविषये कश्चन पूर्वपक्षम् अन्यः सिद्धान्तपक्षं च उपस्थापयेत्। स्ववक्तव्यविषयस्य शास्त्रान्तरेण सम्बन्धं/ साम्यं / भेदं पूर्वपक्षं, सिद्धान्तं च सम्यगवगच्छेयुः। स्पर्धारम्भात् एकघण्टातः पूर्वं सोपानत्रये अपि निर्दिष्टेभ्यः विषयेभ्यः कश्चन विषयविशेषः शास्त्रार्थविषयस्य शीर्षकत्वेन उद्घोष्यते। प्रत्येकं स्पर्धालुयुगलस्य परीक्षणं सोपानत्रये क्रियते।

- प्रथमसोपाने निर्दिष्टेषु विषयेषु कष्चन विषयः स्पर्धार्थं प्रदीयते। तद्विषयमादाय स्पर्धालुयुगलेन शास्त्रार्थः कर्तव्यः। निर्णायकाः विषयोपस्थापनकाले कदापि प्रष्नं कर्तुम् अर्हन्ति। निर्णायकाः स्पर्धाल्वोः विषयप्रतिपादनसामर्थ्यस्य विषयज्ञानस्य च परीक्षणं कुर्युः। तत्र उत्तीर्णं युगलषट्कं द्वितीयसोपानं प्रति आर्हतां प्राप्नोति। अस्मिन् सोपाने प्रतियुगलं विषयोपस्थापनार्थं 15 निमेषाः प्रदीयन्ते।
- द्वितीयसोपाने अत्र प्रथमसोपाने प्रदत्तं विषयं विहाय निर्दिष्टेषु विषयेषु कष्चन विषयः प्रदीयते। तद्विषयमादाय युगलषट्केन शास्त्रार्थः कर्तव्यः। तत्रापि पुनः निर्णायकाः स्पर्धाल्वोः विषयप्रतिपादनसामर्थ्यस्य विषयज्ञानस्य च परीक्षणं कुर्युः। निर्णायकाः विषयोपस्थापनकाले कदापि प्रष्नं कर्तुम् अर्हन्ति। तत्र उत्तीर्णं युगलद्वयं तृतीयसोपानं प्रति गच्छति। अस्मिन् सोपाने प्रतियुगलं विषयोपस्थापनार्थं 15 निमेषाः प्रदीयन्ते।
- तृतीयेसोपाने अत्र प्रथमसोपाने द्वितीयसोपाने च प्रदत्तं विषयं विहाय निर्दिष्टेषु विषयेषु कष्चन विषयः शास्त्रचर्चायै प्रदीयते। तद्विषयमादाय युगलद्वयेन शास्त्रार्थः कर्तव्यः। तत्रापि निर्णायकाः स्पधाल्वोः विषयप्रतिपादनसामर्थ्यस्य विषयज्ञानस्य च परीक्षणं कुर्युः। निर्णायकाः विषयोपस्थापनकाले कदापि प्रष्नं कर्तुम् अर्हन्ति। तत्र युगलमेकं प्रथमस्थानं प्राप्नोति। अन्यत् च युगलं द्वितीयस्थानं प्राप्नोति। अस्मिन् सोपाने प्रतियुगलं विषयोपस्थापनार्थं 30 निमेषाः प्रदीयन्ते।